स्थोपि तद्धर्मैर्नलिप्तो व्योमवन्मुनिः सर्ववन्मूकवत्तिष्ठेदसक्तो वायुवच्चरेत् ५२ उपाधि
विलयाद्विष्णौ निर्विशेषं विशेन्मुनिः जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ५४ यल्ला
भान्नापरो लाभो यत्सुखान्नापरं सुखं यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ५५ य
द्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भव. यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ५६ ति
र्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयं अनंतं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ५७ अतद्व्यावृ
त्तिरूपेण वेदांतैर्लक्ष्यतेऽद्वयं अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत् ५८ अखंडानंदरू
पस्य तस्यानंदलवाश्रिताः ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽखिलाः ५९ तद्युक्त
मखिलं वस्तु व्यवहारस्तदन्वितः तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ६० अनण्व
स्थूलमह्रस्वमदीर्घमजमव्ययं अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ६१ यद्भासा
भास्यतेऽर्कादिर्भास्यैर्यत्तु न भास्यते येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ६२ स्वयमंतः

आत्मबो
ध
४

ऽतं व्याप्य भासयन्नखिलं जगत् ब्रह्म प्रकाशते वह्निप्रतप्तायसपिंडवत् ६३ जगद्विलक्ष
णं ब्रह्म ब्रह्मणोऽन्यन्न विद्यते ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ६४ दृश्यते श्रूयते
यद्ब्रह्मणोऽन्यन्न किंचन तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयं ६५ सर्वगं सच्चिदात्मानं ज्ञा
नचक्षुर्निरीक्षते अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ६६ श्रवणादिभिरुद्दीप्तो ज्ञा
नाग्निपरितापितः जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं ६७ हृदाकाशोदि
तो ह्यात्मा बोधभानुस्तमोपहृत् सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ६८ दि
ग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं यः स्वात्मतीर्थं भजते
विनिष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ६९ इति श्रीमच्छंकराचार्यविरचित
आत्मबोधः संपूर्णः संवत् १८११ मासोत्तमे मासे श्रावणमासे पंचम्यां गुरु
वासरे कृष्णपक्षे उल्लेखनं कृतं श्यामसुन्दरेन कर्पूरस्थलनगरे

स्वपठनार्थम् शुभमस्तु सर्व
मङ्गलं भवतु जगतां ॥

दुर्गा
४

3

समाप्तोयं

4